अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातकोत्तरकार्यक्रमः - द्वैतवेदान्तः

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली - 110002

Curriculum Development Committee for One Year PG in Dvaita Vedanta

Prof. Sukant Kumar Senapati

Chairperson of the committee and Vice-Chancellor, Shri Somnath Sanskrit University, Veraval.

✉ sukantsnpt@gmail.com

Prof. Narayana Pujar

Professor and Head, Department of Dvaita Vedanta, National Sanskrit University, Tirupati, Andhra Pradesh. ✉ nspm12@gmail.com

Dr. Gowtham R.

Asst. Professor, Department of Philosophy, University of Patanjali (UoP), Haridwar, Uttarakhand.

✉ gowtham@uop.edu.in

Dr. Srinivasa Kumar N Acharya

Convenor of the Committee and Asso. Professor and HoD, Dept. of Philosophy, Manipal Academy of Higher Education, Manipal, Karnataka. ✉ head.philosophy@manipal.edu

विषयसूची

कार्यक्रमस्य परिचयः

(Introduction of the Program)

अस्य कार्यक्रमस्य उद्देश्यं तावत् नवीनदृष्टिकोणयुक्तानां स्नातकच्छात्राणां सर्वेषां द्वैतदर्शनस्य स्नातकोत्तरपाठ्यक्रमेषु उन्मुखीकरणम् अस्ति। अयं पाठ्यक्रमः Learning Outcome-based Curriculum Framework (LOCF) इत्यस्य आधारेण रूपितः अस्ति, यः विविधविश्वविद्यालयेषु अनुसर्तुं योग्यः अस्ति।अयं पाठ्यक्रमः "National Education Policy 2020", NHEQF, NCrF इत्यादि नूतनशिक्षानीतिसम्बद्धदिशानिर्देशैः सह अनुरूपतया निर्मितः अस्ति।

LOCF-पद्धतिः स्नातकोत्तरस्तरे लक्ष्यकेन्द्रितस्य अनुसन्धानात्मकस्य पाठ्यक्रमस्य प्रस्तुतये उपकरोति। इयं पद्धतिः "छात्रकेन्द्रितायाः शिक्षण-अधिगमप्रक्रियायाः आविष्करणे अत्युपयुक्ता भवति इति अभिप्रायेण निरूपिता अस्ति। एषा पद्धतिः छात्राणाम् अधिगमानुभवे संशोधनकार्ये स्पष्टतां दार्ढ्यं च समुत्पादयति। अनया पद्धत्या छात्राः स्वाभीष्टविषयमाश्रित्य शोधकर्मणि संलग्नाः भवन्ति। ईदृशः स्नातकोत्तरपाठ्यक्रमः छात्राणां न केवलं दर्शनविषये शिक्षणं प्रददाति अपि तु संशोधनकर्मणि प्रेरयति। अपि च व्यक्तित्वविकसनेन सह उपजीविकां कल्पयति।

LOCF-पद्धतिः पाठ्यक्रमस्य स्वभावं स्वरूपं वा विस्तरेण वर्णयति अपि च पाठ्यक्रमस्य अध्ययनात् यानि यानि फलानि प्राप्यन्ते, तानि अपि सूचयति। अनया पद्धत्या स्नातकोत्तरस्तरपाठ्यक्रमात् व्यज्यमानाः गुणाः निर्दिश्यन्ते। एते गुणाः संशोधने प्रवृत्तिः, एकस्मिन् बहुषु वा विषये विषयेषु नैपुण्यं, स्वास्थ्यम्, भावनात्मकसंतुलनम्, समालोचनात्मकचिन्तनम्, सामाजिकन्यायः च एवं औद्योगिककौशलानि भवन्ति। अयं कार्यक्रमः छात्रेषु निरन्तराध्ययनसंशोधनयोग्यतां, स्थिरजीवनं च जनयति। द्वैतदर्शनाध्ययनसंशोधनविषये श्रद्धाम् उत्साहञ्च जनयति। **एम्.ए. द्वैतदर्शनम्** (आचार्यपाठ्यक्रमः) इत्यस्य पाठ्यक्रमस्य मुख्यं लक्ष्यं भवति संशोधनपद्धतिप्रदर्शनम्। तदर्थं नैके तुलनात्मक-विमर्शात्मक-विवरणात्मक-विश्लेषणात्मकविषया अत्र सन्निवेशिताः। ते च यथेच्छं छात्रान् शोधमार्गे प्रेरयन्ति। विविधदर्शनान्याश्रित्य समीक्षात्मकानि, विमर्शात्मकानि, विविष्टचिन्तनपराणि लेखनानि रचयितुं स्रोतः समुपलभ्यते। अयं पाठ्यक्रमः अंतर्विषयात्मकपद्धतिम् अनुसरति यया छात्राः द्वैतदर्शनतत्त्वानि इतरदर्शनतत्त्वैस्सह तोलने विमर्शने च समर्था भवन्ति। अनुसन्धानक्षेत्रे, अध्यापनक्षेत्रे च प्रौढिं निपुणतां सम्पादयितुं योग्या भवन्ति। यांश्च अन्यान् विषयान् अपि पठन्ति, तेषु विषयेषु अपि विशिष्टां जिज्ञासां प्राप्नुवन्ति। अयं पाठ्यक्रमः यथा संशोधनकर्मकौशलेन सह तथा मानवजीवनकौशलेन, सामाजिकविज्ञानेन, अध्यात्मविज्ञानेन च सह सम्बन्धं स्थापयति। अनेन पाठ्यक्रमेण छात्राः द्वैतदर्शनस्य विष्लेषणे समस्या-समाधानयोरधिगमने च सामर्थ्यं सम्पादयन्ति। एषः पाठ्यक्रमः छात्रेषु सर्वोत्तमं बौद्धिकसामर्थ्यम् जनयितुं रचितः अस्ति। येन छात्रः बुद्धिवैशद्यं व्यक्तित्वविकासं सामाजिकजीवनविकासं च आसादयितुं समर्थः भवेत्।

२. अधिगमपरिणामाधारितपाठ्यचर्यारूपरेखा (Learning Outcome based Curriculum Framework)

अयं पाठ्यक्रमः द्वैतदर्शनस्य अध्ययने तस्य प्रतिपादने सामर्थ्यम् सम्पादयितुं, तथा द्वैतदर्शनस्योपरि ये च आक्षेपाः याश्चानुपपत्तयः वा प्रदर्श्यन्ते प्रतिवादिभिः तन्निराकरणे अपेक्षितां बुद्धिशक्तिम् आविष्कर्तुं तद्द्वारा

द्वैतदर्शनाध्ययने संशोधने छात्राणां रुचिं च जनयितुं संरचितः वर्तते। अयं कार्यक्रमः छात्राणाम् अधिकतमां मनोनुकूलतां (flexibility) कल्पयितुम् आयोज्यते।

अत्र मुख्यविषयान्तर्गतानि ६ (Core Disciplinary papers) पत्राणि सन्ति, यानि द्वैतदर्शनविषये विमर्शात्मकं-विश्लेषणात्मकं-विवरणात्मकं-तुलनात्मकञ्च ज्ञानं, तार्किकं च चिन्तनम् अध्ययनं च यथावत् प्रयच्छन्ति। अयं बहुविकल्पाधारितः अयं पाठ्यक्रमः इति छात्राः स्वस्वरुच्यानुसारं शिक्षां स्वयमेव निश्चेतुं शक्नुवन्ति।

पाठ्यक्रमोऽयम् न केवलं प्राच्यनदर्शनेषु अपि तु पाश्चात्य-आधुनिकदर्शनेषु च ज्ञानं कौशलं च संवर्धयति। अन्येषु विषयेषु अपि आवश्यकानि कौशलानि संवर्धयति। एम्.ए. द्वैतदर्शनपाठ्यक्रमः अंतःश्शास्त्रीयः बहुशास्त्रीयः मुख्यतया संशोधनप्रधानः अस्ति। यश्च विविधदर्शनैस्सह द्वैतदर्शनस्य विमर्शात्मकं-विश्लेषणात्मकं-विवरणात्मकं-तुलनात्मकं अध्ययनं विधातुं प्रेरयति। यश्च दर्शनान्तरसम्बद्धविषयाणां संशोधनसम्बद्धकौशलानां प्राप्त्युपायः भवति।

एतस्य पाठ्यक्रमस्य मुख्यविषयाः (Core), अंतश्शास्त्रीयबहुशास्त्रीय-विषयविशेषवैकल्पिकपत्राणां (Interdisciplinary Multidisciplinary Electives), कौशलवर्धनपाठ्यानां (Skill Enhancement Courses) च सम्यक् संयोजनं आवहति। अनेन द्वैतदर्शनस्य अध्ययनं तत्र संशोधनञ्च कुर्वन् छात्रः भारतीयदर्शनेषु अपि यथायोग्यं ज्ञानं लभते।

२.१ कार्यक्रमस्य स्वरूपम् एवं विस्तृतिः

एम्.ए. द्वैतदर्शनपाठ्यक्रमः द्विवर्षीयः/एकवर्षीयः अस्ति। एकस्मिन् वर्षे द्वे सत्रे भवतः। अतः सम्पूर्णपाठ्यक्रमे चत्वारि/द्वौ सत्राणि/सत्रे भवन्ति/भवतः। प्रतिसत्रं षोडशसप्ताहपर्यन्तः अध्ययनाध्यापनमूल्याङ्कनकालः निश्चितो भवति।

अस्मिन् पाठ्यक्रमे अध्यापनम् अध्ययनं संशोधनञ्च सैद्धान्तिककक्षाभिः (Lecture व्याख्यानरूपेण) तथा प्रशिक्षणकक्षाभिः (Tutorial) सङ्गोष्ठीभिः (Seminars) सह सम्पन्नं भवति।

पाठ्यक्रमः औपचारिकव्याख्यानैः सह अध्याप्यते, यत्र Powerpoint प्रस्तुतीनां, Audio-Video उपकरणानां च उपयोगः करणीयः। यथायोग्यमवसरः प्राप्तः चेत् अन्यानि शिक्षणसाधनानि अपि प्रयोक्तुं शक्यन्ते।

केषुचित् पाठ्येषु अतिरिक्तानि अपेक्ष्यानि भवन्ति, यथा – वृत्तचित्रदर्शनम् (Documentary), चलनचित्रदर्शनम्, क्षेत्रकार्यं (Field Work), अभिलेखसंग्रहणम् (Archival Work), विविधविदुषां/संस्थानां दर्शनम् (Interaction With Scholars and Visit to Gurukula), परियोजनायाः कार्यम् (Project Work) इत्यादीनि। एतानि नियमिताध्यापनसहितं सम्यक् समायोज्यन्ते।

कार्यक्रमस्य उद्देश्यानि

(Objectives of the Program)

अस्य पाठ्यक्रमस्य उद्देश्यम् एवम्प्रकारेण निर्दिष्टम् भवति -

- मूलग्रन्थैः सह विशिष्टव्याख्यादिशास्त्रसञ्चयानां सम्यगध्ययनम्
- द्वैतवेदान्त-तत्त्वशास्त्रे गम्भीरस्य विशिष्टस्य वा ज्ञानस्य सम्पादनम्।
- द्वैत-मतसम्बद्ध- ऐतिहासिक-वैचारिक-विकासस्य, मीमांसा-पद्धतेः, संशोधनम्।
- संस्कृतभाषायाः, व्याकरणस्य, शास्त्रव्याख्यानपद्धतेः च संशोधनकौशलस्य च सम्पादनम्।
- पूर्वपक्ष-सिद्धान्त-निरूपण-पद्धत्याः साहाय्येन शास्त्रार्थ-प्रतिवादादिषु सामर्थ्यसम्पादनम्।
- अनुसन्धानकार्येषु स्वतन्त्रतया प्रबन्ध-निर्माणे, प्रकाशने, अनुवादकर्मणि वा कौशलसम्पादनम्।
- शिक्षण-अध्यापन-अनुसन्धानक्षेत्रेषु विशेषज्ञता सम्पादनम्।
- द्वैतमतस्य सन्दर्भे समकालीन-दार्शनिक-धार्मिक-नैतिकविमर्शाणाम् आक्षेपाणां परिहरणे प्रवर्तनम्।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

अस्मिन् पाठ्यक्रमे पञ्चीकृताः छात्राः अत्यावश्यककौशलानां सामर्थ्यानां च पूर्णतया सङ्ग्रहणे प्रशिक्ष्यन्ते। एतानि अधोलिखितलक्ष्याणि संसाधयितुम् अवसरं लप्स्यन्ते -

PLO I – द्वैततत्त्वशास्त्रे विद्यमानानां प्रमुखतत्त्वानां विश्लेषणे-विमर्शने समार्था भविष्यन्ति।

PLO II – संस्कृतशास्त्रग्रन्थानां स्वतन्त्रतया पठनेऽध्ययने, मनने, व्याख्याने च सामर्थ्यं सम्पादयिष्यन्ति।

PLO III – शास्त्रार्थपद्धत्याः पूर्वपक्ष-सिद्धान्त-क्रममाश्रित्य वादं प्रस्तोतुं समर्था भविष्यन्ति।

PLO IV – शोधपत्रस्य, परिसंवादस्य, अनुसन्धानप्रस्तावस्य च रचनायां कौशलं प्राप्स्यन्ति। संस्कृत-भाषया लेखने-भाषणे च पटुतां प्राप्स्यन्ति। शोधोपकरणानि (शास्त्रीयाणि आधुनिकानि च) उपयोक्तुं समर्था भविष्यन्ति।

PLO V – द्वैतवेदान्त-शास्त्रपरम्परायां गौरवबुद्धिं, प्राप्स्यन्ति संस्कृतेः परिपालनञ्च करिष्यन्ति। विद्वत्सु विनम्रतां सत्सङ्गतिं सद्विचारपरतां सम्पादयिष्यन्ति।

PLO VI – समकालीन-दार्शनिक-धार्मिक-सामाजिकसन्दर्भेषु द्वैतदर्शनस्य सम्प्रयोगे सम्मर्थ्यं सम्पादयिष्यन्ति। द्वैतवेदान्ततत्त्वज्ञानस्य गूढं बोधं सम्पादयितुं।

संस्कृतस्नातकोत्तराणां योग्यतासंसूचकानि

(Qualification Descriptors for Sanskrit Postgraduates)

1. स्नातकोत्तरगुणाः (Post Graduate Attributes)

पाठ्यक्रमस्य समापनानन्तरं छात्राः समालोचनात्मकचिन्तनस्य, युक्तियुक्तपरीक्षणस्य, प्रभावपूर्णसंवादस्य च कौशलानि अर्जयिष्यन्ति। ते प्राच्यपाश्चात्यदर्शनयोः तथा भूतवर्तमान-आध्यात्मिकचिन्तनयोः सम्बन्धं विवेक्तुं शक्नुवन्ति, मानवसमाजस्य अध्ययनाय यः दार्शनिकसम्बद्धविवादः (Philosophical debates) अतीव महत्वपूर्णः अस्ति, तस्मिन् अपि संवेदनशीलाः भविष्यन्ति।

एम्.ए. द्वैतदर्शनपाठ्यक्रमे स्नातकापेक्षिताः निम्नलिखिताः गुणाः भवन्ति - Graduate Attributes

GA1 – द्वैतदर्शनस्य तौलनिकज्ञानं तार्किकचिन्तनसामर्थ्यं, संशोधन-अध्यापनसामर्थ्यविकासः

GA2 – प्राच्य-पाश्चात्यदर्शनानामध्ययनसामर्थ्यं द्वैतदर्शनस्य दर्शनान्तरे प्रभावः कीदृश इति बोधः।

GA3 – जटिलानां दार्शनिकसमस्यानां विवादानां मूल्याङ्कनं, तर्कविन्यासस्य सम्यगवबोधः, तस्य समालोचनात्मकविमर्शः च।

GA4 – दीर्घकालपर्यन्तं तथा विभिन्न-सांस्कृतिक-भौगोलिकक्षेत्रेषु प्रवृत्तानां दार्शनिकचिन्तनानां प्रतिमानानां (patterns) विमर्शन-विश्लेषणक्षमता।

GA5 – सामाजिक-सांस्कृतिकविषयेषु दर्शनानां प्रभावः ज्ञायते। ऐतिहासिकदृष्ट्या दर्शनानां विकासस्य परिचयः च ज्ञायते।

GA6 – राष्ट्रीयभावनायाः पुरुषार्थविवेकस्य, मानवमूल्यानां, संविधानमूल्यानां च सम्मानबुद्धिः जायते।

GA7 – व्यक्तित्वविकसनं तथा उपर्युक्तविश्लेषणशक्तीनां सम्पादनं भवति।

GA8 – संस्कृतौ परम्परायां च श्रद्धा, चिन्तनशक्तेः संवर्धनं देशस्य विविधतायाः अवगमनं भवति।

2. योग्यता-निर्देशकाः (Qualification Descriptors)

पाठ्यक्रमस्य समुचितरीत्या समापनानन्तरं छात्राः द्वैतदर्शदर्शने स्नातकोत्तरपदवीम् (M.A.Dvaita Vedanta) प्राप्नुवन्ति। अस्य विभागस्य द्वैतदर्शनस्नातकोत्तरपदवीविभूषिताः विभिन्नज्ञानक्षेत्रेषु, शोधसंस्थासु औद्योगिकक्षेत्रेषु च संलग्नाः आत्मसंतोषजनकं कार्यं सम्पादयितुं समर्थाः भविष्यन्ति।

ते द्वैतदर्शने प्रमुखानां ग्रन्थानां ज्ञानं सम्पाद्य दर्शनसम्बद्धैः विद्वत्संवादैः सह सम्बन्धं च स्थापयितुं शक्नुवन्ति। एषः ज्ञानप्रकारः द्वैतदर्शदर्शने उच्चशिक्षायाः संशोधनप्रवृत्तौ वा एकः दृढः आधारः भवति।

अपि च, विशिष्टविषयकौशलेन सह यानि जीवनोपयोगीनि कौशलानि, - यथा तर्कशक्तिः, संवादकौशलम्, नूतना दृष्टिः, व्यक्तित्वविकसनं, मूल्याङ्कनबुद्धिः च - इत्येतानि अपि दार्शनिकविषयाध्ययनेन विकसितानि भवन्ति। जटिलेऽस्मिन्जीवनसन्दर्भे मानवसमाजस्य उत्कर्षाय दार्शनिकतत्त्वानाम् अध्ययनं कुर्वन्तः एते छात्राः समृद्धं, फलप्रदं, अर्थपूर्णं च जीवनं नेतुं समर्थाः भवन्ति।

अधोलिखिताः विकल्पाः द्वैतदर्शनस्नातकपाठ्यक्रमे प्रशिक्षितस्य छात्रस्य उद्योगावकाशान् सूचयन्ति -

१. अध्यापनम् अनुसन्धानं च।
२. नीतिनिर्माणं शासनञ्च।
३. धार्मिकसंस्थासु नियुक्तिः।
४. सार्वजनिकजीवनं जनप्रतिनिधित्वञ्च।
५. पत्रकारितायां तथा समूहमाध्यमेषु कार्यम्।
६. सामाजिकसेवा तथा सामाजिककार्यसम्बद्धकार्याणि।
७. अभिलेखागारेषु, सङ्ग्रहालयेषु, पुरातत्त्व-अनुसन्धानक्षेत्रेषु च संलग्नता।
८. प्रशासनिककार्येषु नियुक्तिः।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
ब्रह्मसूत्रभाष्याणां तौलनिकाध्ययनम्	✓	✓	✓	✓	✓	✓	✓
भगवतः जीवनियामकत्वम्	✓	✓	✓	✓	✓	✓	✓
मोक्षसाधनानि	✓	✓	✓	✓	✓	✓	✓
तमसः अतिरिक्तद्रव्यत्वम्	✓	✓	✓	✓	✓	✓	✓
प्रत्यक्षस्य प्राबल्यम्	✓	✓	✓	✓	✓	✓	✓
जगत्सृष्टिक्रमः	✓	✓	✓	✓	✓	✓	✓
विविधमतानुसारं जगत्कर्तृत्वचिन्तनम्	✓	✓	✓	✓	✓	✓	✓
अयथार्थज्ञानविमर्शः	✓	✓	✓	✓	✓	✓	✓

वैकल्पिकानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MINOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
जैनदर्शनसामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
बौद्धदर्शनसामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
नूतनवेदन्तदर्शने प्रमाणानि	✓	✓	✓	✓	✓	✓	✓
ब्रह्मसूत्रस्वामिनारायणभाष्यं (चतुःसूत्री)	✓	✓	✓	✓	✓	✓	✓
भारतीयज्ञानपरम्परा	✓	✓	✓	✓	✓	✓	✓
रामानुज-दर्शनचिन्तनम्	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1.	प्रथमसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 1.1: ब्रह्मसूत्रभाष्याणां तौलनिकाध्ययनम्	4	600-699
2.		प्रधानः 1.2: भगवतः जीवनियामकत्वम्	4	600-699
3.		प्रधानः 1.3: मोक्षसाधनानि	4	600-699
4.		प्रधानः 1.4: तमसः अतिरिक्तद्रव्यत्वम्	4	600-699
5.	द्वितीयसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 2.1: प्रत्यक्षस्य प्राबल्यम्	4	600-699
6.		प्रधानः 2.2: जगत्सृष्टिक्रमः	4	600-699
7.		प्रधानः 2.3: विविधमतानुसारं जगत्कर्तृत्वचिन्तनम्	4	600-699
8.		प्रधानः 2.4: अयथार्थज्ञानविमर्शः	4	600-699

वैकल्पिकपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य वैकल्पिकपाठ्यकमाः	गौणः 1.क.1: जैनदर्शनसामान्यपरिचयः	4	600-699
2		गौणः 1.क.2: बौद्धदर्शनसामान्यपरिचयः	4	600-699
3		गौणः 1.क.3: नूतनवेदन्तदर्शने प्रमाणानि	4	600-699
4	द्वितीयसत्रार्द्धस्य वैकल्पिकपाठ्यकमाः	गौणः 2.क.1: ब्रह्मसूत्रस्वामिनारायणभाष्यं (चतुःसूत्री)	4	600-699
5		गौणः 2.क.2: भारतीयज्ञानपरम्परा	4	600-699
6		गौणः 2.क.3: रामानुज-दर्शनचिन्तनम्	4	600-699

प्रधानपाठ्यक्रमाः

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: ब्रह्मसूत्रभाष्याणां तौलनिकाध्ययनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ब्रह्मसूत्रभाष्याणां तौलनिकाध्ययनस्य परिचयप्रदानम्।
2. भारतीयदर्शनानां तुलनात्मकमध्ययनं प्राचीनाचार्यैः क्रियमाणमासीदित्यस्य परिचयप्रदानम्।
3. दर्शनविश्वकोशत्वेन श्रीमन्न्यायसुधायाः प्रदर्शनम्।
4. सकलदार्शनिकाभिमतानां बन्धमोक्षादितत्त्वानां बोधनम्।
5. बन्धमिथ्यात्वविमर्शनपूर्वकं बन्धसत्यतायाः निरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ब्रह्मसूत्रभाष्याणां तौलनिकाध्ययनं करिष्यन्ति।
2. प्राचीनाचार्यैः कृतानां व्याख्यानानां दृष्टिकोणं ज्ञास्यन्ति।
3. ब्रह्ममीमांसाशास्त्रस्य प्रथमसूत्राक्षराणां व्याख्याने समर्थाः भविष्यन्ति।
4. श्रीमन्न्यायसुधारीत्या शास्त्रस्य अनुबन्धचतुष्टय निरूपणक्रमं ज्ञास्यन्ति।
5. मोक्षरूपप्रयोजनस्य कथं परमात्मज्ञानं साधनं भवतीति ज्ञातुं शक्ष्यन्ति।
6. बन्धमिथ्यात्वविमर्शनप्रक्रियां ज्ञास्यन्ति।
7. सकलदार्शनिकदृष्टीनां बन्धमोक्षादिविषये तुलनात्मकाध्ययनं करिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	ब्रह्मसूत्रभाष्याणां तौलनिकाध्ययनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ग्रन्थारम्भसमर्थनम्। **श्रेयोऽङ्कः १**

- विषयाभावशङ्का।
- प्रयोजनाभावशङ्का।
- अधिकारिसम्बन्धाभावशङ्का।

अन्वितिः २. प्रथमसूत्रव्याख्यानम्। **श्रेयोऽङ्कः १**

- ओङ्कारार्थविवेचनम्।
- विषयसमर्थनम्।

- "ब्रह्मजिज्ञासा" इत्यत्र समासविचारः।
- गतार्थताशङ्का तन्निरासश्च।
- जिज्ञासायाः निष्प्रयोजनत्वाशङ्का।

अन्वितिः ३. जिज्ञासाशब्दार्थविचारः। **श्रेयोऽङ्कः १**

- जिज्ञासायाः निष्प्रयोजनत्वाशङ्कानिरासः।
- जिज्ञासाशब्दार्थः।
- यौगिकस्यापि पदस्य लक्षणोपपत्तिः।
- मोक्षप्रयोजनवत्त्वम्।

अन्वितिः ४. बन्धसत्यत्त्वसमर्थनम्। **श्रेयोऽङ्कः १**

- मोक्षस्य हर्यधीनत्त्वम्।
- बन्धमिथ्यात्वाशङ्का।
- बन्धमिथ्यात्वानिरासः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जयतीर्थमुनिः, *श्रीमन्न्यायसुधा (प्रथमसूत्रव्याख्यानारम्भात् बन्धमिथ्यात्वपर्यन्तम्)*

सहायकाः ग्रन्थाः (Additional Readings)

1. *श्रीमन्न्यायसुधा षट्टिप्पणिसमेता*, बेंगळूरु : उत्तरादिमठः।
2. नागेन्द्राचार्यः (संपादकः), *श्रीमन्न्यायसुधा मूलमात्रम्।*
3. *श्रीमन्न्यायसुधा कन्नडानुवादसहिता*, बेंगळूरु : पूर्ण प्रज्ञा विद्यापीठ।

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: भगवतः जीवनियामकत्वम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. सर्वोपनिषदां सारभूतस्य तत्त्वस्य परमात्मनः परिचयप्रदानम्।
2. षट्सु अपि ब्राह्मणेषु प्रतिपादितानां भेदमोक्षादितत्त्वानां निरूपणम्।
3. भगवतः नारायणस्य सकलजगन्नियामकत्वप्रतिपादनम्।
4. मुक्तानां मुक्तियोग्यानाञ्च स्वरूपं कीदृशमिति बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भगवतः नारायणस्य महत्त्वं ज्ञास्यन्ति।
2. विविधासु अवस्थासु कथं भगवतः जीवनियामकत्वमिति प्रतिपादने समर्थाः भविष्यन्ति।
3. मुक्तानां मुक्तियोग्यानां स्वरूपं ज्ञास्यन्ति।
4. उपनिषद्वैषम्योपस्थापनपूर्वकं दर्शनान्तरप्रतिपादितस्य जीवनियामकत्वस्य तौलनिकचिन्तने सामर्थ्यं सम्पादयिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	भगवतः जीवनियामकत्वम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. षडाचार्यब्राह्मणं कूर्चब्राह्मणं च। **श्रेयोऽङ्कः १**

- वागादिनामक-भगवदुपासनाक्रमः।
- हृदयनामकभगवदुपासना।
- इन्द्रनामकभगवदुपासना।
- सारभोक्ता हरिः।

अन्वितिः २. ज्योतिर्ब्राह्मणम्। **श्रेयोऽङ्कः १**

- ज्योतिर्ब्राह्मणम्।
- अवस्थात्रये स्वर्गमुक्त्योः भगवानेव ज्ञानसाधनम्।
- मुक्तेषु आनन्दतारतम्यम्।

- अर्चिरादिमार्गः।

अन्वितिः ३. शारीरब्राह्मणम्। श्रेयोऽङ्कः १

- मरणोत्क्रमणयोः निरूपणम्।
- नित्यः तरतमभावः।
- मुक्त्यवस्थानिरूपणम्।
- जीवेश्वरभेदः सत्यः नित्यश्च।

अन्वितिः ४. मैत्रेयीब्राह्मणं तथा वंशब्राह्मणं च। श्रेयोऽङ्कः १

- मैत्रेय्याः अध्यात्मनिष्ठा।
- देवास्सर्वे भगवदधीनाः।
- सर्वशास्त्राणि हयग्रीवादेव निःसृतानि।
- भगवानेव सर्वाश्रयः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *बृहदारण्यकोपनिषत्खण्डार्थः (षष्ठाऽध्यायः)*

सहायकाः ग्रन्थाः (Additional Readings)

1. आनन्दतीर्थः, *बृहदारण्यकोपनिषद्भाष्यम्*, सर्वमूलग्रन्थाः।
2. *उपनिषद्भाष्यम्*, बङ्गलूरुः : पूर्ण प्रज्ञा विद्यापीठ।
3. *उपनिषद्भाष्यम्* (टीकासहितम्), बङ्गलूरुः : Dvaita Vedanta Studies & Research Foundation.
4. बृह*दारण्यकोपनिषद्भाष्यम्*, बङ्गलूरुः : PPSM.

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: मोक्षसाधनानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. संसारः कः भवति मरणकाले जीवस्य गमनं कथं भवतीति परिचयः।
2. कर्म कथं सम्पाद्यते तस्य फलं कीदृशमित्यस्य निरूपणम्।
3. पाप-पुण्यकर्मणां फलं नरकाद्यनर्थवर्णनम्।
4. मोक्षमार्गाणां बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. जीवत्रैविध्यं तथा तदनुगुणा गतिः कीदृशी भवतीति ज्ञास्यन्ति।
2. प्रेतस्य लोकान्तरगमनं कीदृशं कथं भवतीति ज्ञास्यन्ति।
3. कर्म कथं जीवं बध्नातीति ज्ञास्यन्ति।
4. वैराग्यस्य मोक्षसाधनत्वम् अवगमिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	**मोक्षसाधनानि**	**04**	**0**	**0**	**04**

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. तदन्तराधिकरणम्। **श्रेयोऽङ्कः १**

- अध्याय-पादाधिकरणादिसङ्गतिनिरूपणम्।
- भूतबन्धस्तु संसारः मुक्तिस्तेभ्यो विमोचनमित्यादिपूर्वपक्षः।
- भूतानि भागतः जीवमनुधावन्तीति समर्थनम्।

अन्वितिः २. कर्मपरम्पराविच्छेदाय वैराग्यं सम्पादनीयम्। **श्रेयोऽङ्कः १**

- प्राणाविनाभूतभूतैः सहैव जीवस्य गमनम्।
- अधिकारिभेदः।
- अकाम्यकर्मिणामपि ज्ञानद्वारा एव मोक्षः।
- कर्मपरम्परापर्यन्तं संसारः।

अन्वितिः ३. कर्मशुद्धिसिद्ध्यर्थं वैराग्यम्। **श्रेयोऽङ्कः १**

- इष्टादिकारिणां समीचीनाचारः आवश्यकः।

- काष्ण्र्याजिनि-बादर्योः मतनिरूपणम्।
- हरिद्वेषिणां गतिनिरूपणम्।
- विविधनरकदुःखनिरूपणम्।

अन्वितिः ४. जीवगतिनिरूपणम्। **श्रेयोऽङ्कः १**

- अर्चिरादिमार्गनिरूपणम्।
- तृतीयेऽन्धं तमसि दुःखमात्रम्।
- कर्मिणः भूलोके जनिप्रकारः।
- विरक्तेन भगवान् भजनीयः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीमध्वाचार्यः, *ब्रह्मसूत्रभाष्यम् (साधनाऽध्यायस्य प्रथमः पादः)*
2. श्रीमध्वाचार्यः, *ब्रह्मसूत्रभाष्यम् (श्रीजयतीर्थविरचिततत्त्वप्रकाशिकासहितम्)*, बङ्गलूरुः : द्वैतवेदान्त-अध्ययन-शोधप्रतिष्ठानम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीमध्वाचार्यः, *ब्रह्मसूत्रभाष्यम्*, बङ्गलूरुः : ABMM.
2. श्रीमध्वाचार्यः, *ब्रह्मसूत्रभाष्यम्*, बङ्गलूरुः : PPSM.
3. श्रीमध्वाचार्यः, *ब्रह्मसूत्रभाष्यम्*, बङ्गलूरुः : द्वैतवेदान्तअध्ययन-शोधप्रतिष्ठानम्।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: तमसः अतिरिक्तद्रव्यत्वम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. नैयायिकमतरीत्या द्रव्यविभागः कथं भवतीति परिचयः।
2. द्वैतमतरीत्या द्रव्यानां विभागनिरूपणम्।
3. तमसः अतिरिक्तद्रव्यत्वे अनुपपत्तिप्रदर्शनम्।
4. नैयायिकमतविमर्शनपूर्वकं सिद्धान्तस्थापनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. नैयायिकमते कथं पदार्थविभागः क्रियते इति ज्ञास्यन्ति।
2. तेजोऽभाव एव तमः इति नैयायिकमतस्य निरूपणे समर्थाः भविष्यन्ति।
3. नैयायिकोक्तयुक्तिविमर्शनप्रकारं ज्ञास्यन्ति।
4. सिद्धान्ते तमसः अतिरिक्तद्रव्यत्वं कथं स्थापितमिति अवगमिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	तमसः अतिरिक्तद्रव्यत्वम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. तमः नातिरिक्तद्रव्यम्। **श्रेयोऽङ्कः १**

- सामान्यतः नैयायिकमतानुसारं द्रव्यनिरूपणम्।
- तमः नातिरिक्तद्रव्यमित्यत्र युक्तिप्रदर्शनम्।
- तमसि नीलरूप-चलनक्रिया-भ्रान्तिसमर्थनम्।

अन्वितिः २. न्यायग्रन्थेषु तमोवादः। **श्रेयोऽङ्कः १**

- किरणावलीकारस्य मतम्।
- न्यायसिद्धान्तदीपकारस्य मतम्।
- न्यायकन्दलिकारस्य मतम्।

अन्वितिः ३. तर्कताण्डवे तमसः द्रव्यत्वसाधनम्। **श्रेयोऽङ्कः १**

- तमसः द्रव्यत्वसाधने निमित्तचिन्तनम्।

- तमसः द्रव्यत्वे प्रमाणप्रदर्शनम्।
- नालोकाभावः तमः।

अन्वितिः ४. तमसः द्रव्यत्वनिरूपणम्। **श्रेयोऽङ्कः १**

- तमसः रूपवत्वनिरूपणम्।
- तमसः क्रियावत्वनिरूपणम्।
- तमः न आलोकाभावः न वालोकाज्ञानम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *तर्कताण्डवम्* (शक्तिवादे तमसः द्रव्यत्वनिरूपणम् ११), (सम्पादकाः - डी. श्रीनिवासाचार्यः एम्.ए., विद्वान् माधवाचार्यः, विद्वान् व्यासाचार्यः), मैसूरु : ओरिएण्टल् रिसर्च् इन्स्टिट्यूट्।

सहायकाः ग्रन्थाः (Additional Readings)

1. Shashadhara. *Nyayasiddhanta Deepa*. Ahmedabad: L.D. Institute of Indology.
2. Shvetavaikuntha Shastri. (1940). *Nyayasiddhanta Muktavali with Kiranavali*. Varanasi: Published by B.K. Shastri.
3. Shridhara Bhatta. (1885*). Prashastapada Bhashyam with Nyayakandali*. Varanasi: Ganganatha Jha Granthamala.

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 2.1: प्रत्यक्षस्य प्राबल्यम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. प्रमाणानां प्राबल्यदौर्बल्यक्रमस्य परिचयप्रदानम्।
2. कथं लौकिकविषयेषु प्रत्यक्षस्य प्राबल्यमित्यस्य अवबोधनम्।
3. श्रीमन्न्यायामृते विमृष्टानां मीमांसान्यायानां अवबोधनम्।
4. जगत्सत्यताग्राहिप्रत्यक्षस्य प्राबल्यसमर्थनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. जगतः सत्यत्वं बहुदार्शनिकसम्मतं तत्त्वम् इति ज्ञास्यन्ति।
2. जगत्सत्यत्वग्राहि प्रत्यक्षं कथं प्रबलमिति निरूपयितुं समर्थाः भविष्यन्ति।
3. पूर्वमीमांसान्यायसञ्चारः उत्तरमीमांसायां कथं भवतीति ज्ञास्यन्ति।
4. वेदान्ततत्त्वानां सूक्ष्मदृष्ट्या विमर्शनकौशलं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	प्रत्यक्षस्य प्राबल्यम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रत्यक्षस्य जात्या उपक्रमादिन्यायैश्च प्राबल्यम्। **श्रेयोऽङ्कः १**

- प्रत्यक्षस्य जात्या प्राबल्यसमर्थनम्।
- प्रत्यक्षस्य अनुपसञ्जातविरोधित्वात् प्राबल्यम्।
- लिङ्गाद्यपेक्षया शीघ्रगामित्वात् प्राबल्यम्।
- विशेषविषयत्वाच्च प्रत्यक्षस्य प्राबल्यम्।

अन्वितिः २. प्रत्यक्षस्य उपजीव्यत्वेन प्राबल्यसमर्थनम्। **श्रेयोऽङ्कः १**

- द्वैतग्राहिप्रत्यक्षस्य अद्वैतश्रुत्यपेक्षया प्राबल्यम्।
- प्रत्यक्षस्य उपजीव्यत्वसमर्थनम्।
- मिथ्यात्वानुमानस्य प्रत्यक्षबाध्यत्वम्।

अन्वितिः ३. प्रत्यक्षस्य अनुमानबाध्यत्वे बाधकम्। **श्रेयोऽङ्कः १**

- प्रत्यक्षस्य अनुमानबाध्यत्वे अग्निशैत्यानुमानेन औष्ण्यप्रत्यक्षस्य बाध्यत्वापत्तिः।

- मीमांसान्यायप्रदर्शनपूर्वकं प्रत्यक्षस्य अनुमानबाध्यत्वाभावसमर्थनम्।
- प्रत्यक्षस्य अनुमानबाध्यत्वे बाधकप्रदर्शनम्।

अन्वितिः ४. अपच्छेदन्यायवैषम्यम्। **श्रेयोऽङ्कः १**

- प्रत्यक्षस्य शब्दबाध्यत्वे बाधकम्।
- मीमांसान्यायप्रदर्शनम्।
- अपच्छेदन्यायनिरूपणम्।
- वैषम्यप्रदर्शनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीमद्व्यासतीर्थः**,** *न्यायामृतम् (२०तः २४ प्रकरणानि)*, बेङ्गलूरुः : विद्याधीश-स्नातकोत्तर-संस्कृत-शोधकेन्द्रः, उत्तरादिमठ।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीमद्व्यासतीर्थः, *न्यायामृतम्*, बङ्गलूरुः : द्वैतवेदान्तअध्ययन-शोधप्रतिष्ठानम्, उत्तरादिमठः।
2. श्रीमद्व्यासतीर्थः, *न्यायामृतम्* (सम्पादकः – प्रो. ए. हरिदास भट्टः), बङ्गलूरुः : PPSM.
3. श्रीमद्व्यासतीर्थः, न्यायामृतम् (सम्पादकः – प्रो. ए. हरिदास भट्टः), SGSV, राघवेन्द्रस्वामीमठः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: जगत्सृष्टिक्रमः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विभिन्नदार्शनिकाभिमतस्य सृष्टिक्रमस्य परिचयः।
2. सृष्टिप्रक्रियायां विविधदेवतानां तत्त्वानाञ्च पात्रं किमिति बोधनम्।
3. स्वप्नाद्यवस्थानां वर्णनम्।
4. षोडशकलासृष्टेः विस्तरेण अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. देवोत्तमस्य विष्णोः जीवोत्तमस्य मुख्यप्राणस्य च स्वरूपं ज्ञास्यन्ति।
2. स्वप्नावस्थायाः विवेचनमुपनिषत्सु कथमस्तीति अवगमिष्यन्ति।
3. प्रणवोपासनाप्रकारं तस्य महत्वञ्च अधिगमिष्यन्ति।
4. षोडशकलानां सृष्टिप्रक्रियायां स्थानं ज्ञास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	जगत्सृष्टिक्रमः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सृष्टिक्रमस्य परिचयः। **श्रेयोऽङ्कः १**

- सृष्टिकर्तुः परिचयः।
- मुख्यप्राणस्य भारत्याः च सृष्टिः।
- मुख्यप्राणभारत्योः कालनियामकत्वम्।
- देवयानपितृयाणनिरूपणम्।

अन्वितिः २. सृष्टेः विस्तारः। **श्रेयोऽङ्कः १**

- वायुजीवोत्तमत्त्वम्।
- वायोः सर्वाधारत्त्वम्।
- तात्त्विकदेवतासु स्पर्धा।

अन्वितिः ३. मुख्यप्राणस्य प्रभुत्त्वम्। **श्रेयोऽङ्कः १**

- मुख्यप्राणस्य सर्वाधारत्त्वनिरूपणम्।

- स्वप्नसुषुप्त्योः निरूपणम्।
- तात्त्विकदेवानां मुख्याश्रयः परमात्मा।

अन्वितिः ४. प्राणाग्निविद्या षोडशकला च। श्रेयोऽङ्कः १

- स्वाप्नप्रपञ्चविस्तारः।
- शरीरशब्दार्थप्रपञ्चः।
- प्रणवोपासना तस्याः फलञ्च।
- षोडशकलानिरूपणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीराघवेन्द्रयतिकृतः *षट्प्रश्नोपनिषत्खण्डार्थः*।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीमदानन्दतीर्थः, *आथर्वणोपनिषद्भाष्यम्*, सर्वमूलग्रन्थाः।
2. श्रीमदानन्दतीर्थः, *उपनिषद्भाष्यम्*, बङ्गलूरुः : PPSM.
3. श्रीमदानन्दतीर्थः, *उपनिषद्भाष्यम् (टीकासहितम्)*, बङ्गलूरुः : द्वैतवेदान्तसंशोधनप्रतिष्ठानम्, उत्तरादिमठः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: विविधमतानुसारं जगत्कर्तृत्वचिन्तनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विविधमतानुसारं जगत्कर्तृत्ववादस्य परिचयः।
2. प्रकृत्यादीनां जडपदार्थानां जगत्कर्तृत्वं न सम्भवतीति प्रदर्शनम्।
3. विभिन्नदार्शनिकैः प्रस्तुते जगत्कारणतावादे विद्यमानानां दोषाणाम् अवबोधनम्।
4. विष्णोरेव जगत्कर्तृत्वं कथं समर्थितमिति अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. जगत्कर्तुः विषये विभिन्नदार्शनिकानाम् अभिप्रायं ज्ञास्यन्ति।
2. प्रकृतेः जगत्कर्तृत्वमिति वदतां साङ्ख्यानां मते दोषानुद्भावयितुं समर्थाः भविष्यन्ति।
3. परमाण्वारम्भवादम् उपस्थापयतां वैशेषिकादीनां मते दोषानुद्भावयितुं समर्थाः भविष्यन्ति।
4. अन्यदेवतानां शक्तीनां वा जगत्कर्तृत्वमुपस्थापयतां मतानां विमर्शने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	विविधमतानुसारं जगत्कर्तृत्वचिन्तनम्	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. साङ्ख्यमतविमर्शः। **श्रेयोऽङ्कः १**

- प्रकृतेः जगत्कर्तृत्वस्य निरासः।
- ईश्वरसाहाय्येन प्रकृतेः जगत्कर्तृत्ववादः तस्य विमर्शः।
- चार्वाकाः न दार्शनिकाः।
- जीवसम्बन्धेन प्रकृतेः जगत्कारणत्ववादः तस्य विमर्शश्च।

अन्वितिः २. वैशेषिकमतविमर्शः। **श्रेयोऽङ्कः १**

- परमाण्वारम्भवादविमर्शः।
- समवायसम्बन्धविमर्शः।
- श्रुतिविरुद्धत्वप्रदर्शनम्।

अन्वितिः ३. बौद्धजैनमतविमर्शः। **श्रेयोऽङ्कः १**

- परमाणुसमुदायवादविमर्शः।

- क्षणिकत्वशून्यवादयोः विमर्शः।
- विज्ञानवादविमर्शः।
- जैनानां सप्तभङ्गिन्यायविमर्शः।

अन्वितिः ४. शाक्तमतविमर्शः। **श्रेयोऽङ्कः १**

- पशुपतेः न जगत्कर्तृत्वम्।
- शक्तेः न जगत्कारणत्वम्।
- विष्णोरेव जगत्कर्तृत्वम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीमदानन्दतीर्थः, *ब्रह्मसूत्रभाष्यम्*।
2. श्रीमदानन्दतीर्थः, *ब्रह्मसूत्रभाष्यम् (श्रीजयतीर्थविरचिततत्त्वप्रकाशिकासहितम्)*, बङ्गलूरुः : द्वैतवेदान्तसंशोधनप्रतिष्ठानम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीमध्वाचार्यः, ब्रह्मसूत्रभाष्यम्, बङ्गलूरुः : ABMM.
2. श्रीमध्वाचार्यः, ब्रह्मसूत्रभाष्यम्, बङ्गलूरुः : PPSM.
3. श्रीमध्वाचार्यः, ब्रह्मसूत्रभाष्यम्, बङ्गलूरुः : द्वैतवेदान्तसंशोधनप्रतिष्ठानम्।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.4: अयथार्थज्ञानविमर्शः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विभिन्नमतानुसारं ज्ञानस्य स्वरूप-विभाग-लक्षणानां परिचयः।
2. भ्रमात्मकज्ञानस्वरूपविषये विहितानां चिन्तनानाम् अवबोधनम्।
3. श्रीमन्न्यायसुधायां विमृष्टानां पञ्चख्यातिवादानाम् अवबोधनम्।
4. सूक्ष्मदृष्ट्या दार्शनिकतत्त्वानां विमर्शनक्रमपरिचयः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ज्ञानप्रकाराणां तथा तत्स्वरूपविभागलक्षणानां ज्ञानं प्राप्स्यन्ति।
2. भ्रमात्मकज्ञानस्वरूपविषये विहितानां चिन्तनानां विमर्शने समर्थाः भविष्यन्ति।
3. श्रीमन्न्यायसुधाकर्तुः विमर्शनपद्धतिं तद्ग्रन्थस्य महत्वं च ज्ञास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	अयथार्थज्ञानविमर्शः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्राभाकरपरिणामपक्षानुवादः। **श्रेयोऽङ्कः १**

- अन्यथा परिणते वस्तुनि ख्यातिः इत्यस्य विमर्शः।
- वस्तुनो वस्तु-अवन्तरात्मनाऽवभासः इत्यस्य विमर्शः।
- अन्याकारोल्लेख्यन्यालम्बनमित्यस्य विमर्शः।
- विषयत्वपरिष्कारः इदं रजतमिति ज्ञानस्य गतिकल्पनम्।

अन्वितिः २. प्राभाकरोक्तस्य अख्यातिमतस्य निरासः। **श्रेयोऽङ्कः १**

- अन्यदन्यात्मना विषयीकुर्वज्ज्ञानम् अन्यथाख्यातिः।
- विषयत्वपरिष्कारविमर्शः।
- औत्सर्गिकं ज्ञानानां प्रामाण्यम्।
- भ्रमस्थले “इदं रजतम्” इत्येकमेव ज्ञानम्।

अन्वितिः ३. रामानुजोक्ताऽख्यातिवादः। **श्रेयोऽङ्कः १**

- सर्वस्य सर्वात्मकत्वम्।

- श्रुतार्थापत्तिरयुक्ता।
- रामानुजाख्यातिपक्षनिरासः।
- तार्किकैकदेशिनाम् अख्यातिशङ्का तन्निरासश्च।

अन्वितिः ४. प्राचीनतार्किकोक्ताख्यातिवादः तन्निरासश्च। **श्रेयोऽङ्कः १**

- भ्रान्तौ प्रतीयमानस्य रजतस्य अन्यत्र सत्वनिरूपणम्।
- रजतस्य असत्वमेव युक्तं नान्यत्र सत्वमेव।
- विज्ञानवादमायावादयोः निरूपणं तन्निरासश्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीजयतीर्थमुनिः, *श्रीमन्न्यायसुधा पञ्चाख्यातिवादः।*

सहायकाः ग्रन्थाः (Additional Readings)

1. सुधाश्रीमन्न्यायः, *षट्टिप्पणिसमेता*, बङ्गलूरुः : उत्तरादिमठः।
2. नागेन्द्राचार्यः, विद्वान् (संपादकः), *श्रीमन्न्यायसुधा मूलमात्रम्।*
3. *श्रीमन्न्यायसुधा कन्नडानुवादसहितम्*, बङ्गलूरुः पूर्ण प्रज्ञा विद्यापीठ।

वैकल्पिकपाठ्यक्रमाः

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

वैकल्पिकः पाठ्यक्रमः (DSE) 1.क.1: जैनदर्शनसामान्यपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. जैनदर्शनस्य सामान्यपरिचयः प्रमुखतत्त्वानाम् अवबोधनम्।
2. जैनदर्शनस्य रत्नत्रयपरिचयः तस्य महत्त्वावबोधनम्।
3. जैनदर्शनस्य प्रमुखप्रमाणप्रमेयानाम् अवबोधनम्।
4. जैनसम्प्रदायगतानाम् आचारविचाराणां बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. जैनदर्शनस्य मूलं परम्पराञ्च ज्ञास्यन्ति।
2. जैनदर्शनप्रतिपादिततत्त्वानि निरूपयितुं समर्थाः भविष्यन्ति।
3. जैनदर्शनसम्प्रदायप्राप्तकर्मणां ज्ञाने अनुष्ठाने च समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
वैकल्पिकः पाठ्यक्रमः (DSE) 1.क.1	जैनदर्शनसामान्यपरिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. जैनदर्शनस्यपरिचयः ऐतिहासिकता च। **श्रेयोऽङ्कः १**

- जैनदर्शनस्य प्राचीनता।
- जिनस्यस्वरूपम् (मोक्षमार्गनेतृत्वं, कर्मभूभृतभेतृत्वं, विश्वतत्त्वज्ञातृत्वम्)।
- श्रुतपरम्परा।
- प्रमुखाचार्याणां प्रमुखग्रन्थानां च परिचयः।

अन्वितिः२. सम्यग्दर्शनम्। **श्रेयोऽङ्कः १**

- मोक्षस्य मार्गः।
- सम्यग्दर्शनस्य स्वरूपम्।
- सप्ततत्त्वानि नवपदार्थाः।
- षड्-द्रव्याणि पञ्चास्तिकायाः।

अन्वितिः३. प्रमाणमीमांसा। **श्रेयोऽङ्कः १**

- प्रमाणस्य स्वरूपम्।
- प्रमाणस्य भेदप्रभेदाः।
- प्रमाणस्य विषयः फलं च।
- पञ्चज्ञानानि।

अन्वितिः ४. अनगारचारित्रम्। **श्रेयोऽङ्कः १**

- अनगारस्य स्वरूपम् (आचार्य-उपाध्याय-साधूनां)
- अष्टाविंशतिमूलगुणाः।
- द्वादशतपांसि।
- दशधर्माः।

निर्धारिताःग्रन्थाः(Essential/RecommendedReadings/Texts)

1. उमास्वामी, (1950), *तत्त्वार्थसूत्रम्*, (सम्पादकः - फूलचन्दसिद्धान्तशास्त्री), काशी : गणेशप्रसादवर्णी-जैनग्रन्थमाला।

सहायकाःग्रन्थाः(Additional Readings)

1. डॉ. हीरालालजैनः, (1975), *भारतीयसंस्कृतौ जैन्धर्मस्य योगदानम्*, भोपालः : मध्यप्रदेशशासन-साहित्यपरिषद्।
2. नेमिचन्द्रसिद्धान्तिदेवः, (2006), *बृहद्द्रव्यसंग्रहः* (टीकाकारः - ब्रह्मदेवसूरिः), जयपुरः : पं. टोडरमल-स्मारक-ट्रस्ट्।
3. माणिक्यनन्दिः, (2009), *परीक्षामुखम्*, जयपुरः : पं. टोडरमल-स्मारक-ट्रस्ट्।
4. वट्टकेरः, (2004), *मूलाचारः*, दिल्ली : भारतीयज्ञानपीठः।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

वैकल्पिकः पाठ्यक्रमः (DSE) 1.क.2: बौद्धदर्शनसामान्यपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. बौद्धदर्शनस्य सामान्यपरिचयः प्रमुखतत्त्वानां च अवबोधनम्।
2. बौद्धदर्शनस्य मूलसिद्धान्तपरिचयः तस्य महत्त्वावबोधनम्।
3. बौद्धदर्शनस्य प्रमुखप्रमाणप्रमेयानाम् अवबोधनम्।
4. बौद्धसम्प्रदायगतानाम् आचारविचाराणाम् अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. बौद्धदर्शनस्य मूलं परम्पराञ्च ज्ञास्यन्ति।
2. बौद्धदर्शनप्रतिपादिततत्त्वानि निरूपयितुं समर्थाः भविष्यन्ति।
3. बौद्धदर्शनसम्प्रदायप्राप्तकर्मणां ज्ञाने अनुष्ठाने च समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of theCourse)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
वैकल्पिकः पाठ्यक्रमः (DSE) 1.क.2	**बौद्धदर्शनसामान्यपरिचयः**	**04**	**0**	**0**	**04**

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. महायान-दर्शनस्य परिचयः। **श्रेयोऽङ्कः १**

- हीनयान-महायानयोः भेदः।
- शून्यवादस्य मूलसिद्धान्तः।
- प्रमुखानां महायान-सूत्राणां परिचयः।

अन्वितिः२ बोधिचित्तं बोधिसत्त्वञ्च। **श्रेयोऽङ्कः १**

- बोधिचित्तस्य स्वरूपं तद्भेदाश्च।
- बोधिचित्तोत्पादः बोधिसत्त्वस्य च स्वरूपम्।
- षट्पारमिताः (दानम्, शीलम्, क्षान्तिः, वीर्यम्, ध्यानम्, प्रज्ञा)
- करुणा-प्रज्ञयोः समन्वयः बोधिसत्त्व-मार्गस्य च व्यावहारिकं महत्त्वम्।

अन्वितिः३. शून्यता त्रिकायसिद्धान्तश्च। **श्रेयोऽङ्कः १**

- शून्यतावादस्य स्वरूपं नागार्जुनस्य च योगदानम्।
- माध्यमिक-योगाचारदर्शनयोःसंक्षिप्तपरिचयः।

- त्रिकाय-सिद्धान्तः (धर्मकायः, सम्भोगकायः, निर्माणकायः)।
- शून्यतादृष्ट्या नैरात्म्यवादः।

अन्वितिः ४. निर्वाणं मोक्षश्च। **श्रेयोऽङ्कः १**

- महायान-दर्शने निर्वाणस्वरूपम्।
- बोधिसत्त्व-मार्गेण मोक्षप्राप्तिः।
- विश्वकल्याणाय बौद्धदृष्टिः।
- महायानस्य वैश्विकप्रभावः आधुनिकसन्दर्भे च महायानस्य प्रासङ्गिकता।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. डॉ. सङ्घसेनसिंहः, (2020), *बौद्धदर्शनप्रवेशिका*, दिल्लीः : भारतीयबुक्कार्पोरेशन् प्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. डॉ. सत्यव्रतशास्त्री (सम्पादकः), (2015), *प्रज्ञापारमिताहृदयसूत्रम्*, दिल्लीः : भारतीयविद्याप्रकाशनम्।
2. नागार्जुनः, (2012), *मध्यमककारिका* (सम्पादकः – डॉ. रामशंकरत्रिपाठी), दिल्लीः : मोतीलाल बनारसीदासप्रकाशनम्।
3. डॉ. परशुरामशर्मा, (2018), *लङ्कावतारसूत्रम्*, वाराणसीः : चौखम्बासंस्कृतसंस्थानम्।
4. प्रो. रामशंकरत्रिपाठी, (2015), *बौद्धदर्शनप्रस्थानम्*, सारनाथः, वाराणसी : केन्द्रीय उच्चतिब्बती शिक्षासंस्थानम्।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

वैकल्पिकः पाठ्यक्रमः (DSE) 1.क.3: नूतनवेदन्तदर्शने प्रमाणानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अक्षरपुरुषोत्तमदर्शने प्रतिपादितानां प्रमाणानाम् अवबोधनम्।
2. प्रमाणविषये नूतनस्य चिन्तनस्य आविष्करणम्।
3. अक्षरपुरुषोत्तमदर्शनस्य दर्शनान्तरैः सह प्रमाणविषये विमर्शनाय प्रेरणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अक्षरपुरुषोत्तमदर्शने प्रतिपादितानि प्रमाणानि ज्ञास्यन्ति।
2. प्रमाणविषये नूतनं चिन्तनं प्राप्स्यन्ति।
3. अक्षरपुरुषोत्तमदर्शनस्य दर्शनान्तरैः सह प्रमाणविषये विमर्शं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of theCourse)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
वैकल्पिकः पाठ्यक्रमः (DSE) 1.क.3	नूतनवेदन्तदर्शने प्रमाणानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रमाणधारा (प्रमाणलक्षणादितः) **श्रेयोऽङ्कः १**

- प्रमाणलक्षणम्।
- ज्ञानाऽविनाभावी ह्यात्मा।
- लक्षणदोषाः।

अन्वितिः२ प्रमाणधारा (प्रत्यक्षप्रमाणम्) **श्रेयोऽङ्कः १**

- प्रत्यक्षद्वैविध्यम्।
- लक्षणनिरूपणम्।
- स्मृतिनिरूपणम्।

अन्वितिः३. प्रमाणधारा (अनुमानप्रमाणम्) **श्रेयोऽङ्कः १**

- अनुमानम्।
- व्याप्तिः।
- हेत्वाभासाः।

अन्वितिः ४. प्रमाणधारा (उपमानप्रमाणम्) **श्रेयोऽङ्कः १**

- उपनिषत्सूपमानप्रयोगः।
- गीतासूपमानप्रयोगः।
- वचनामृतेषूपमानप्रयोगः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. साधुः भद्रेशदासः, (2022), स्वामिनारायणसिद्धान्तसुधा, अहमदाबादः, स्वामिनारायण-अक्षरपीठः।

सहायकाः ग्रन्थाः (Additional Readings)

1. अन्नम्भट्टः, (2012), *तर्कसङ्ग्रहः* (सम्पादकौ - डॉ. ए. वि. नागसम्पिगे, डॉ. माधवाचार्यः पाण्डुरङ्गी), बङ्गलूरुः : पूर्णप्रज्ञ-संशोधन-मन्दिरम्।
2. एस्. एन्. दासगुप्तः, (2012), *भारतीय दर्शन का इतिहासः*, जयपुरम् : राजस्थान-हिन्दी-ग्रन्थ-अकादमी।
3. महर्षिगौतमः, (2021), *न्यायदर्शनम्* (सम्पादकः - आचार्य उदयवीरशास्त्री)
4. महर्षिगौतमः, (2018), *न्यायदर्शनम्* (सम्पादकः - आचार्य ढुण्ढिराजशास्त्री), वाराणसीः : चौखम्बा-संस्कृत-भवनम्।
5. विश्वनाथपञ्चाननभट्टाचार्यः, (2003), *न्यायसिद्धान्तमुक्तावली*, वाराणसीः : चौखम्बा-संस्कृत-संस्थानम्।
6. श्रीकृष्णावधूतपण्डितः, (2006), *तर्कनवनीतम्* (सम्पादकौ - डॉ. श्रीनिवासः वरखेडी, डॉ. वीरनारायणः पाण्डुरङ्गी), बङ्गलूरुः : पूर्णप्रज्ञ-संशोधन-मन्दिरम्।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

वैकल्पिकः पाठ्यक्रमः (DSE) 2.क.1: ब्रह्मसूत्रस्वामिनारायणभाष्यं (चतुःसूत्री)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. ब्रह्मपदार्थविषयेऽवबोधनम्।
2. जगत्कारणत्वविषये नूतनं चिन्तनम्।
3. शास्त्रयोनित्वाधिकरणे नूतनतर्काणां परिचयः।
4. नूतनदर्शनद्वारा तर्कप्रस्थानस्य अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. ब्रह्मपदार्थविषये नूतनं चिन्तनं प्राप्स्यन्ति।
2. जगत्कारणत्वविषये नूतनं चिन्तनं प्राप्स्यन्ति।
3. शास्त्रयोनित्वाधिकरणे नूतनतर्काणां प्रयोगे समर्थाः भविष्यन्ति।
4. नूतनदर्शनद्वारा तर्कप्रस्थानस्याऽस्य ग्रन्थस्य ज्ञानं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of theCourse)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
वैकल्पिकः पाठ्यक्रमः (DSE) 2.क.1	ब्रह्मसूत्रस्वामिनारायण भाष्यं (चतुःसूत्री)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. ब्रह्मजिज्ञासा। **श्रेयोऽङ्कः १**

- मङ्गलवादः।
- ब्रह्मपदार्थनिर्णयः।
- ब्रह्मणोर्जिज्ञास्यत्वम्।

अन्वितिः २ ब्रह्मणः लक्षणम्। **श्रेयोऽङ्कः १**

- ब्रह्मणोर्जगत्कर्तृत्वम्।
- ब्रह्मशब्दविमर्शः।
- लक्षणविमर्शः।

अन्वितिः ३. ब्रह्मणः शास्त्रयोनित्वम्। **श्रेयोऽङ्कः १**

- ब्रह्मणोः शास्त्रोपपादकत्वम्।
- अलौकिकार्थेऽनुमानस्याऽकिञ्चित्करत्वम्।

अन्वितिः ४. वेदान्तवाक्यानां समन्वयः। **श्रेयोऽङ्कः १**

- वेदान्तवाक्यानां समन्वये मीमांसकैः सह विमर्शः।
- उपक्रमोपसंहारादिना मुण्डके ब्रह्मविद्यायाः परीक्षणम्।
- उपक्रमादिना आनन्दवल्ल्याः परीक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. साधुः भद्रेशदासः, (२०२२), *ब्रह्मसूत्रस्वामिनारायणभाष्यम्,* अहमदाबादः, स्वामिनारायण-अक्षरपीठः।

सहायकाः ग्रन्थाः (Additional Readings)

1. *मुण्डकोपनिषत्* द्वैताद्वैतभाष्याणि।
2. *ब्रह्मसूत्रभाष्याणि,* शङ्कर–रामानुज–मध्वभाष्याणि।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

वैकल्पिकः पाठ्यक्रमः (DSE) 2.क.2: भारतीयज्ञानपरम्परा

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वेदवेदाङ्गदर्शनादिभिः सह विज्ञानकलासाहित्ययोः समन्विताध्ययनम्।
2. भारतीयज्ञानस्य बहुविषयकस्वरूपस्य अवबोधनम्।
3. भारतीयज्ञानपरम्परावगतेः प्रयोजननिरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्राचीन-अर्वाचीनज्ञानयोः समन्वये समर्थाः भविष्यन्ति।
2. प्राचीनभारतीयतत्त्वचिन्तनानां सामाजोपयोगिताप्रदर्शने समर्थाः भविष्यन्ति।
3. वैज्ञानिकदृष्ट्या भारतीयतत्त्वशास्त्राणां चिन्तने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
वैकल्पिकः पाठ्यक्रमः (DSE) 2.क.2	भारतीयज्ञानपरम्परा	04	0	0	04

Details of Course:

Unit I Foundations of Indian Knowledge Systems. **Credit 1**

- Vedic and UpaniṢadic Frameworks.
- Epistemology in Classical Texts.
- Oral and Written Traditions.
- Integration with Ecology.

Unit II Scientific and Mathematical Contributions. **Credit 1**

- Ancient Indian Astronomy.
- Āyurveda and Holistic Health.
- Mathematics and Linguistics.
- Metallurgy and Engineering.

Unit III Philosophy, Governance and Arts. **Credit 1**

- Ethical Frameworks.
- Political Philosophy.

- Aesthetic Traditions.
- Music and Mathematics.

Unit IV IKS in Contemporary Contexts. Credit 1

- Decolonizing Knowledge.
- Modern Science and IKS Synergies.
- Technology and Ethics.
- Policy and Education.

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. चट्टोपाध्यायः, देबिप्रसादः, (१९७७), *Science and Society in Ancient India*, कोलकाता : रिसर्च् इंडिया पब्लिकेशन्स्।
2. शर्माः, प्रियव्रतः (अनुवादकः), (१९८१), *चरकसंहिता – अङ्ग्लभाषानुवादेन सह*, वाराणसी : चौखम्भा ओरियण्टालिया।
3. स्टाल्, फ्रिट्स्, (२००८), *Discovering the Vedas: Origins, Mantras, Rituals, Insights*, नवदिल्ली : पेंग्विन् पुस्तकाः।
4. काङ्ग्ले, आर्. पी. (सम्पादकः), (१९६०–१९६५), *कौटिलीयार्थशास्त्रम् (त्रयोः खण्डेषु)*, मुम्बई : बॉम्बे-विश्वविद्यालयः।

सहायकाः ग्रन्थाः (Additional Readings)

1. गणेरिः, जोनार्डनः, (२०११), *The Lost Age of Reason: Philosophy in Early Modern India,* 1450–1700, ऑक्स्फोर्ड् : ऑक्स्फोर्ड्-विश्वविद्यालय-प्रेस्।
2. वाचस्पतिः उपाध्यायः, (सम्पादकः), (१९९५), *भारतीयदर्शनकोशः* (Bharatiya Darshan Kosh), वाराणसी : चौखम्भा-संस्कृत-मालिका।
3. *Comprehensive Encyclopedia of Indian Philosophical Systems: Integrating Vedic, Scientific, and Artistic Traditions.*
4. गोपीनाथकविराजः, (सङ्कलकः), (१९८०), *विश्वकोषः (Vishwakosha),* वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

वैकल्पिकः पाठ्यक्रमः (DSE) 2.क.3: रामानुज-दर्शनचिन्तनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. रामानुजदर्शने विहितस्य परमतविमर्शस्य चिन्तनम्।
2. रामानुजमतप्रतिपादितस्य पदार्थत्रयस्य अवबोधनम्।
3. रामानुजमते विहितस्य अद्वैतमतस्य विमर्शनम्।
4. रामानुजमतानुसारं जीवब्रह्मस्वरूपचिन्तनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. रामानुजदर्शने विहितम् इतरमतविमर्शनप्रकारं ज्ञास्यन्ति।
2. रामानुजमतप्रतिपाद्यानि तत्त्वानि निरूपयितुं शक्ष्यन्ति।
3. रामानुजमतानुसारं जीवब्रह्मस्वरूपप्रतिपादने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
वैकल्पिकः पाठ्यक्रमः (DSE) 2.क.3	**रामानुज-दर्शनचिन्तनम्**	**04**	**0**	**0**	**04**

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. रामानुजदर्शने इतरमतविमर्शनम्। **श्रेयोऽङ्कः १**

- अनेकान्तवादविमर्शः।
- सप्तभङ्गीनयनिरासः।
- जीवपरिमाणवादः।

अन्वितिः२ रामानुजदर्शने पदार्थत्रयनिरूपणम्। **श्रेयोऽङ्कः १**

- चित् अचित् तथा ईश्वरः।
- अद्वैतमतस्य पूर्वपक्षः रामानुजसिद्धान्तश्च।
- जीवस्वरूपनिरूपणम्।
- भावरूपाज्ञानवादः।

अन्वितिः३. रामानुजमते ब्रह्मस्वरूपम्। **श्रेयोऽङ्कः १**

- ब्रह्मणः सर्वशब्दवाच्यत्वम्।
- निर्विशेषत्व-निर्गुणत्वयोः निरासः।
- ईश्वरस्वरूपनिरूपणम्।

- ईश्वरस्य पञ्चमूर्तयः।

अन्वितिः ४. ब्रह्ममीमांसाशास्त्रपरिचयः (चतुस्सूत्री)। श्रेयोऽङ्कः १

- ब्रह्ममीमांसाशास्त्रे प्रथमसूत्रव्याख्यानम्।
- ब्रह्मजिज्ञासा इत्यस्यार्थः।
- भक्तेः निरूपणम्।
- ब्रह्मलक्षण-प्रमाण- समन्वयनिरूपणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *सर्वदर्शनसङ्ग्रहः*, (अभ्यङ्ककरवासुदेवशास्त्रिविरचितया व्याख्यया सहितः), (१९५८), पुणे : प्राच्यविद्या-संशोधन-मन्दिरम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. आचार्यः का. ई. देवनाथन्, *विशिष्टाद्वैतवेदान्तशास्त्रप्रवेशिनी*, तिरुपतिः : राष्ट्रिय-संस्कृत-विश्वविद्यालयः।
2. पद्मभूषणः आचार्यः बलदेवउपाध्यायः, *भारतीयदर्शन*, वाराणसी : शारदा-मन्दिरम्।
3. पद्मभूषणः आचार्यः बलदेवउपाध्यायः, *संस्कृतवाङ्मयस्य बृहद् इतिहासः*, दशमखण्डः, लखनऊ : उत्तरप्रदेश-संस्कृत-संस्थानम्।